# "सदाचारस्मृति"

श्रीमद्धनुमद्भीममध्वांतर्गतरामकृष्णवेद्व्यासात्मकलक्ष्मीहयग्रीवायनमः ॥ हरिः ॐ ॥ यस्मिन्सर्वाणिक
र्माणिसंन्यस्याध्यात्मचेतसा ॥ निराशीर्निर्ममोयातिपरंजयतिसोच्युतः ॥१॥ स्मृत्वाविष्णुंसमुत्थायकृत
शौचोयथाविधि ॥ धौतदंतःसमाचम्यस्नानंकुर्याद्विधानतः ॥२॥ उद्धृतेतिमृदालिप्यद्विषडष्टषडक्षरैः ॥ त्रि
र्निमज्याऽऽप्यसूक्तेनप्रोक्षयित्वापुनस्तथा ॥३॥ मृदालिप्यनिमज्यत्रिस्त्रिर्जपेदघमर्षणं ॥ स्रष्टारंसर्वलोका
नांस्मृत्वानारायणंपरं ॥४॥ यतःश्वासोनिमग्नोप्सुप्रणवेनोत्थितस्ततः ॥ सिंचेत्पुरुषसूक्तेनस्वदेहस्थंहरिं
स्मरन् ॥५॥ वसित्वावासआचम्यप्रोक्ष्याचम्यचमंत्रतः ॥ गायत्र्याचांजलिंदत्वाध्यात्वासूर्यगतंहरिं ॥६॥
मंत्रतःपरिवृत्याथसमाचम्यसुरादिकान् ॥ तर्पयित्वानिपीड्याथवासोविस्तृत्यचांजसा ॥ ७ ॥ अर्कमंडल
गंविष्णुंध्यात्वैवत्रिपदींजपेत् ॥ सहस्रपरमांदेवींशतमध्यांदशावरां ॥८॥ आसूर्यदर्शनात्तिष्ठेत्ततस्तूपविशे
तवा ॥ पूर्वांसंध्यांसनक्षत्रामुत्तरांसदिवाकरां ॥९॥ उत्तरामुपविश्यैववाग्यतःसर्वदाजपेत् ॥ ध्येयःसदास
वितृमंडलमध्यवर्तीनारायणःसरसिजासनसन्निविष्टः ॥ केयूरवान्मकरकुंडलवान्किरीटीहारीहिरण्मयवपु
र्धृतशंखचक्रः ॥ १० ॥ गायत्र्यात्रिगुणंविष्णुंध्यायन्नष्टाक्षरंजपेत् ॥ प्रणम्यदेवान्विप्रांश्चगुरूंश्चहरिपार्ष




दान् ॥११॥ एवंसर्वोत्तमंविष्णुंध्यायन्नेवार्चयेद्धरिं ॥ ध्यानप्रवचनाभ्यांचयथायोग्यमुपासनं ॥१२॥ धर्मेणे
ज्यासाधनानिसाधयित्वाविधानतः ॥ स्नात्वासंपूजयेद्विष्णुंवेदतंत्रोक्तमार्गतः ॥१३॥ वैश्वदेवंबलिंचैवकु
र्यान्नित्यंतदर्पणं ॥ इष्टंदत्तंहुतंजप्तंपूर्तंयच्चात्मनःप्रियं ॥१४॥ दारान्सुतान्प्रियान्प्राणान्परस्मैसन्निवेदयेत् ॥
भुक्तशेषंभगवतोभृत्यातिथिपुरस्सरः ॥१५॥ भुंजीतहृद्गतंविष्णुंस्मरंस्तद्गतमानसः ॥ आचम्यमूलमंत्रेण
कोष्ठंस्वमभिमंत्रयेत् ॥१६॥ वेदशास्त्रविनोदेनप्रीणयन्पुरुषोत्तमं ॥ अहःशेषंनयेत्संध्यामुपासीताथपूर्ववत्
॥१७॥ यामात्परतएवाथस्वपेद्ध्यायञ्जनार्दनं ॥ अंतरालेततोबुद्ध्वास्मरेतबहुशोहरिं ॥१८॥ कायेनवाचाम
नसेंद्रियैर्वाबुद्ध्यात्मनावानुसृतःस्वभावं ॥ करोतियद्यत्सकलंपरस्मैनारायणायेतिसमर्पयेत्तत् ॥१९॥ द्वावि
मौपुरुषौलोकेक्षरश्चाक्षरएवच ॥ क्षरःसर्वाणिभूतानिकूटस्थोक्षरउच्यते ॥२०॥ उत्तमःपुरुषस्त्वन्यःपरमात्मे
त्युदाहृतः ॥ योलोकत्रयमाविश्यबिभर्त्यव्ययईश्वरः ॥२१॥ यस्मात्क्षरमतीतोहमक्षरादपिचोत्तमः ॥ अतो 
स्मिलोकेवेदेचप्रथितःपुरुषोत्तमः ॥२२॥ योमामेवमसंमूढोजानातिपुरुषोत्तमं ॥ ससर्वविद्भजतिमांसर्वभा
वेनभारत ॥२३॥ इतिगुह्यतमंशास्त्रमिदमुक्तंमयानघ ॥ एतद्बुद्ध्वाबुद्धिमान्स्यात्कृतकृत्यश्चभारत ॥२४॥



www.Sumadhwaseva.com श्रीमद्वाचार्य कृत "सर्वमूलग्रंथः"

# "सदाचारस्मृति"

रुद्रंसमाश्रितादेवारुद्रोब्रह्माणमाश्रितः ॥ ब्रह्मामामाश्रितोनित्यंनाहंकंचिदुपाश्रितः ॥२५॥ येमेमतमिदं नित्यमनुतिष्ठंतिमानवाः ॥ श्रद्धावंतोनसूयंतोमुच्यंतेतेपिकर्मभिः ॥२६॥ येत्वेतदभ्यसूयंतोनानुतिष्ठंति मेमतं ॥ सर्वज्ञानविमूढांस्तान्विद्धिनष्टानचेतसः ॥२७॥ द्वौभूतसर्गौलोकेस्मिन्दैवआसुरएवच ॥ विष्णु भक्तिपरोदैवोविपरीतस्तथासुरः ॥२८॥ स्मर्तव्यःसततंविष्णुर्विस्मर्तव्योनजातुचित् ॥ सर्वेविधिनिषेधाः स्युरेतयोरेवकिंकराः ॥२९॥ धर्मोभवत्यधर्मोपिकृतोभक्तैस्तवाच्युत ॥ पापंभवतिधर्मोपियोनभक्तैःकृतो हरेः ॥३०॥ मन्मनाभवमद्भक्तोमद्याजीमांनमस्कुरु ॥ नित्यंभवेच्चमन्निष्ठोबुभूषुःपुरुषस्तथा ॥३१॥ एषनि त्यःसदाचारोगृहिणोवनिनस्तथा ॥ वैश्वदेवंबलिंदंतधावनंचाप्यृतेबटोः ॥३२॥ एवमेवयतेःस्वीयवित्तेनतु विनासदा ॥ मूलमंत्रैःसदास्नानंविष्णोरेवचतर्पणं ॥३३॥ विशेषोनिष्क्रिययतेरजलांजलिनातथा ॥ तर्प णंतुहरेरेवयतेरन्यस्यचोदितं ॥३४॥ समिद्धोमोबटोश्चैवस्मृत्वाविष्णुंहुताशने ॥ सर्ववर्णाश्रमैर्विष्णुरेकए वेज्यतेसदा ॥३५॥ रमाब्रह्मादयस्तस्यपरिवारतयैवतु ॥३६॥ कविंपुराणमनुशासितारमणोरणीयांसमनु स्मरेद्यः ॥ सर्वस्यधातारमचिंत्यरूपमादित्यवर्णंतमसःपरस्तात् ॥३७॥ वेदाहमेतंपुरुषंमहांतं आदित्यवर्णं

सदा॰ ॥ २ ॥

तमसस्तुपारे ॥ सर्वाणिरूपाणिविचित्यधीरः नामानिकृत्वाऽभिवदन्यदास्ते ॥३८॥ धातापुरस्ताद्यमुदाज हार शक्रःप्रविद्वान्प्रदिशश्चतस्रः ॥ तमेवंविद्वानमृतइहभवति नान्यःपंथाअयनायविद्यते ॥३९॥ आनं दतीर्थमुनिनाव्यासवाक्यसमुद्धृतिः ॥ सदाचारस्यविषयेकृतासंक्षेपतःशुभा ॥ ४० ॥ अशेषकल्याणगुण नित्यानुभवसत्तनुः ॥ अशेषदोषरहितःप्रीयतांपुरुषोत्तमः ॥४१॥ इतिश्रीमदानंदतीर्थभगवत्पादाचार्यवि रचितासदाचारस्मृतिःसंपूर्णा ॥ ॥ ॥ ॥

॥ संपूर्णेयंसदाचारस्मृतिः ॥

स्मृतिः ॥७८७॥



www.Sumadhwaseva.com श्रीमद्वाचार्य कृत "सर्वमूलग्रंथः"